॥ श्रीः ॥

बह्वृचोपनिषद्

अप्पय दीक्षित कृत संस्कृत भाष्य एवं
कृष्णानन्द कृत हिन्दी टीका सहित

Rs 0 5

श्री पीताम्बरापीठ संस्कृत परिषद् द्वारा
प्रकाशित एवं प्रचारित

॥ श्रीः ॥

बह्वृचोपनिषद्

अप्पय दीक्षित कृत संस्कृत भाष्य एवं
कृष्णानन्द कृत हिन्दी टीका सहित

श्री पीताम्बरापीठ संस्कृत परिषद् द्वारा
प्रकाशित एवं प्रचारित

प्रकाशक
श्री पीताम्बरापीठ संस्कृत परिषद्
दतिया (म. प्र.)

मूल्य रु. १

संवत् २०३९
सन् १९८२

: मुद्रक :
शिवशक्ति प्रेस प्रा. लि.
बैद्यनाथ भवन, ग्रेट नाग रोड, नागपुर-९

प्रकाशकीय

श्री ब्रह्मलीन गुरुवर द्वारा बह्वृचोपनिषद् का स्वयं अध्यापन किया गया। तथा श्री विद्या पूजन के समय अभिषेक कार्य में इसके पाठ का विधान है। सभी देवताओं के अभिषेक का ब्रह्म के साथ सामरस्य में ही समापन होता है। यह उपनिषद् भी भगवतीत्रिपुरसुन्दरी का ब्रह्म के साथ सामरस्य का प्रतिपादक है। अतः पाठ एवं ज्ञान के सुविधा हेतु किया गया यह प्रकाशन साधकों के लिये अत्यन्त उपयोगी सिद्ध होगा।

ललिता प्रसाद शास्त्री
मंत्री, श्री पीताम्बरापीठ संस्कृत परिषद्
दतिया

ब्रह्मलीन

श्री पीताम्बरा पीठाधीश्वर राष्ट्रगुरु परमपूज्य श्री १००८ श्री स्वामी जी
महाराज, वनखण्डेश्वर, दतिया (म०प्र०)

॥ श्रीः ॥

बह्वृचोपनिषद्

[1]बह्वृचाख्यब्रह्मविद्यामहाखण्डार्थवैभवम् ।
अखण्डानन्दसाम्राज्यं रामचन्द्रपदं भजे ॥

ॐ इम् वाङ्मे मनसीति शान्तिः ।

देवी ह्येकाऽग्र एवासीत् । सैव जगदण्डमसृजत् । कामकलेति विज्ञायते । शृङ्गारकलेति विज्ञायते । तस्या एव ब्रह्मा अजीजनत् । विष्णुरजीजनत् । रुद्रोऽजीजनत् । सर्वे मरुद्गणा अजीजनन् । गन्धर्व्वाप्सरसः किन्नरा वादित्रवादिनः समन्तादजीजनन् । भोग्यमजीजनत् । सर्वमजीजनत् । सर्वं शाक्तमजीजनत् । अण्डजं स्वेदजमुद्भिज्जं जरायुजं यत्किञ्चैतत् प्राणि स्थावरजङ्गमं मनुष्यमजीजनत् ।

सैषा परा शक्तिः । सैषा शाम्भवी विद्या कादिविद्येति वा हादिविद्येति वा सादिविद्येति वा । रहस्यमोंमोंवाचि प्रतिष्ठा । [2]सैव पुरत्रयं शरीरत्रयं व्याप्य बहिरन्तरवभासयन्तो देशकालवस्त्वन्तरसङ्गान्महात्रिपुरसुन्दरी वै प्रत्यक्चितिः । सैवात्मा ततोऽन्यदसत्यमनात्मा । अत एषा ब्रह्मसंवित्तिर्भावाभावकलाविनिर्मुक्ता चिद्विद्याऽद्वितीयब्रह्मसंवित्तिः सच्चिदानन्दलहरी महात्रिपुरसुन्दरी बहिरन्तरनुप्रविश्य स्वयमेकैव विभाति । यदस्ति सन्मात्रम् । यद्विभाति चिन्मात्रम् । यत्प्रियमानन्दं तदेतत्पर्वाकारा महात्रिपुरसुन्दरी । त्वं चाहञ्च सर्वं विश्वं सर्वदेवता । इतरत्सर्वं महात्रिपुरसुन्दरी सत्यमेकं ललिताख्यं वस्तु तदद्वितीयमखण्डार्थं परं ब्रह्म ।

पञ्चरूपपरित्यागादस्वरूपप्रहाणतः ।
अधिष्ठानं परं तत्त्वमेकं सच्छिष्यते महत् ॥ इति ।

"प्रज्ञानं ब्रह्म" इति वा "अहं ब्रह्मास्मि" इति वा भाष्यते । "तत्त्वमसि" इत्येव सम्भाष्यते । "अयमात्मा ब्रह्म" इति वा 'ब्रह्मैवाहमस्मि" इति वा 'योऽहमस्मि' इति वा 'सोऽहमस्मि'

१–अयं शोकोऽधिकः पुस्तकान्तरे ।
२–इत आरभ्य शिष्यते महदितीत्यन्तः पाठोऽधिकः पुस्तकान्तरे ।

इति वा 'योऽसौ सोऽहमस्मि' इति वा या भाव्यते सैषा षोड़शी श्रीविद्या पञ्चदशाक्षरी श्रीमहात्रिपुरसुन्दरी बालाऽम्बिकेति वा सकलेति वा मातङ्गीति स्वयम्वरकल्याणीति भुवनेश्वरीति चामुण्डेति चण्डेति वाराहीति तिरस्करिणीति राजमातङ्गीति वा शुकश्यामलेति वा लघुश्यामलेति वा अश्वारूढ़ेति वा प्रत्यङ्गिरा धूमावती सावित्री गायत्री सरस्वती ब्रह्मानन्दकलेति । ऋचः अक्षरे परमे व्योमन् । यस्मिन्देवा अधि विश्वे निषेदुः । यस्तन्न वेद किमृचा करिष्यति । य इत्तद्विदुस्त इमे समासते । इत्युपनिषद् । वाङ्मे मनसीति शान्तिः ।

॥ समाप्तेयं बह्वृचोपनिषद् ॥

॥ बह्वृचोपनिषद्भाष्यम् ॥

यस्यां देवी महावाक्यैश्चतुर्भिर्भाष्यते परा ।
बह्वृचाख्योपनिषदं व्याख्यास्ये तां द्विलिङ्गकाम् ॥

देवीति । अग्रे प्राग्जगदुत्पत्तेर्देवी सगुणनिर्गुणोभयात्मिका एका ह्यद्वितीया आसीत् । सैव जगदण्डम् अण्डाकारमिदं जगद् आकाशादिपञ्चीकरणद्वारेणासृजत् ससर्ज्ज । सैव सगुणांशेन कामकलेति शृङ्गारकलेति च विज्ञायते । तस्या एव सकाशाद्ब्रह्मा चतुर्मुखोऽजीजनज्जातः । विष्णुरुद्रमरुद्गणाश्चाजीजनन् । गन्धर्वादिकञ्च सर्वं तस्या एवाजीजनत् । सैषा परा शक्तिर्ब्रह्मविष्णुरुद्रेभ्योऽपि तस्या अधिकत्वेन तुरीयतया स्वप्रधानत्वात् परत्वोपपत्तिः । ननु त्रिमूर्त्युत्तीर्णत्वं निर्गुणस्यैव स्यान्न तु सगुणस्य यदि सगुणस्य च स्यात्तत्रापि शिवस्यैव न तु देव्या इति चेन्न । ब्रह्मविष्णुरुद्रेश्वरसदाशिवाख्यैः प्रसिद्धैः पञ्चदेवैस्तुर्यातीतस्यापि सगुणत्वावगमात्तत्र सदाशिवस्यापि परशक्त्यधीनस्वसत्ताकत्वाच्च । तथाहि ब्रह्मविष्णुरुद्रेश्वरसदाशिवानां पञ्चानामपि देवानां वाणीरमोमोसमनोन्मनीसंज्ञाभिः शक्तिभिस्समेतानामेव मूर्तिमत्त्वं जगद्व्यापाराद्यधिकृतत्वं च सिध्यति । अन्यथा निर्गुणब्रह्मस्वरूपमात्रत्वसिद्धेः । तस्मात्परा शक्तिरेव सर्वकारणस्वरूपिणीति । सैषा परा शक्तिरेव शाम्भवी शन्भुसम्बन्धिनी सगुणा निर्गुणा वा विद्या स्यात् । कएईलह्रीमित्युक्तप्रथमपादार्थत्वात् कादिविद्येति वा हसकलह्रीमित्युक्तद्वितीयपादार्थत्वाद्धादिविद्येति वा सकलह्रीमित्युक्त-

तृतीयपादार्थत्वात्सादिविद्येति वा या भाष्यते सैषा पञ्चदशाक्षरी श्रीविद्यैव शाम्भवीति तस्या ॐवाचि ओङ्कारवचने प्रतिष्ठेति यत्तद्रहस्यमों सत्यमित्यर्थः। सैव परा शक्तिरभ्युदयार्थिभिर्मूर्त्यात्मतयोपास्यमानाऽपि निःश्रेयसार्थिभिरमूर्त्तचैतन्यात्मतयोपास्यमानत्वात्। "प्रज्ञानं ब्रह्म" इति "अहं ब्रह्मास्मि" इति "तत्त्वमसि" इति "अयमात्मा ब्रह्म" इति च सम्भाष्यते। अस्य महावाक्यचतुष्टयस्य रहस्योपनिषदि प्रातिलोम्येन वर्णितार्थत्वादलमतिप्रपञ्चेन। नन्वहमस्मि इति योऽहमस्मीति सोऽहमस्मीति योऽसौ सोऽहमस्मीति यद्वाक्यचतुष्टयमुच्यते अस्य पूर्वोक्तप्रज्ञानंब्रह्मेत्यादिवाक्यचतुष्टयार्थाविलक्षणत्वात्पुनरुक्तिदोषप्रसङ्ग इति चेदत्रोच्यते। न ह्यस्य पूर्ववाक्यार्थाविलक्षणत्वं शक्यं सम्भावयितुम्। पूर्ववाक्यानां प्रातिलोम्येनाधिकारिसम्बन्धविषयप्रयोजनार्थत्वादपरवाक्यानां विषयमात्रार्थत्वाच्च।

यत्त्वहंब्रह्मास्मीत्यभ्यासविषयवाक्यमुक्तं तस्यावृत्तिसूचकमपरमिदं वाक्यचतुष्टयं भवितुमर्हतीत्येवं वैलक्षण्यमवगन्तव्यम्। यथा च "प्रज्ञानं ब्रह्म" इत्यादिवाक्यानां पूर्वपूर्वसाध्यत्वेन उत्तरोत्तरसाधनत्वमस्ति तथाहमस्मीत्यादिवाक्यानामपि वक्तुं युक्तम्। आद्यस्य निदिध्यासनाभ्यासरूपत्वाद्द्वितीयस्य मननाभ्यासरूपत्वात्तृतीयस्य श्रवणाभ्यासरूपत्वाच्चतुर्थस्य दर्शनाभ्यासरूपत्वाच्च। दर्शनश्रवणमननिदिध्यासनानामुत्तरोत्तरसाध्यत्वेन पूर्वपूर्वसाधनत्वं सर्वत्रावोचाम। तस्मात्सर्वमनवद्यमिति। यैवं महावाक्यैर्मुमुक्षुभिर्भाव्यते सैषा निर्गुणब्रह्मचैतन्यस्वरूपिणी पराशक्तिर्व्यवहारदशायां प्रणवेन सह षोडशी श्रीविद्या कादिपञ्चदशाक्षरी महात्रिपुरसुन्दरीत्यादिसगुणनामभिरभिधीयमानाभ्युदयार्थिभिरुपास्यमाना भवति।

ननु निःश्रेयसाभ्युदययोस्तमःप्रकाशयोरिवेतरेतरविरुद्धत्वं सर्वशास्त्रप्रसिद्धम् निःश्रेयसस्य ज्ञानिविषयत्वादभ्युदयस्याज्ञानिविषयत्वाच्च। अस्यां ह्युपनिषदि निःश्रेयसार्थकं निर्गुणोपासनमभ्युदयार्थकं सगुणोपासनमभिहितं दृश्यते। न चात्रैकवाक्यतोपपद्यते "प्रज्ञानं ब्रह्म" इत्यादिमहावाक्यानां सगुणब्रह्मपरत्वकल्पनानौचित्यात्। महात्रिपुरसुन्दरीत्यादिशब्दानां निर्गुणब्रह्मपरत्वकल्पनानौचित्याच्च। तस्माद्विरुद्धमेवैतदुपपादनमिति।

अत्रोच्यते नायं विरोधः। अत्रैकवाक्यताया अनावश्यकत्वात्। निः-श्रेयसाभ्युदयाख्योभयफलसिद्ध्यर्थकसगुणनिर्गुणसमुच्चयोपासनविषया हीयमुपनिषन्मध्यमाधिकारिणमपेक्ष्य प्रवृत्ताऽस्ति। मन्दाधिकारिणः सगुणमात्रोपासकत्वादुत्तमाधिकारिणो निर्गुणमात्रोपासकत्वाच्च। सगुणनिर्गुणयोश्च तमः प्रकाशयोरिव विरुद्धत्वकल्पनमपि उत्तमाधिकारिदृष्टैचव भवितुमर्हति न तु मध्यमाधिकारिदृष्ट्या। समुच्चयोपासनफलभूतनिःश्रेयसाभ्युदययोः सामानाधिकरण्यं च परमेश्वरनियमिताधिकारवत्सु ब्रह्मविष्णुरुद्रेन्द्रादिषु श्रूयते एव। न चाधिकारिव्यतिरिक्तेष्वप्युभयफलसिद्धिरिति शक्यं सम्भावयितुम्। समुच्चयोपासनसिद्धावपि फलसमुच्चयासिद्धेः। तस्मादधिकारिभेदेनोभयलिङ्गतया प्रवृत्तायामस्यामुपनिषदि न कश्चिदपि विरोध इति। इदानीं शब्दब्रह्मविदुषः परब्रह्मवेदनाभावे परमप्रयोजनाभावम् "ऋच" इत्यादिना दर्शयन्नुपनिषदमुपसंहरति ऋच इति। ऋचः ऋगादिवेदमन्त्राः विश्वे सर्वे देवाश्च अक्षरे अविनाशिनि परमे सर्वोत्कृष्टे यस्मिन् व्योमन् व्योमनि चिदाकाशेऽधिनिषेदुरध्यवसन्। चिदाकाशात्मकनिर्गुणपरब्रह्मणस्सकलवेददेवाधिष्ठानत्वे सति कैमुतिकन्यायेन नरतिर्य्यगाद्यशेषप्रपञ्चाधिष्ठानत्वोपपत्तेः। तदक्षरत्वादिलक्षणं परं ब्रह्म यो न वेद न विदितवान् स ब्रह्मात्मैक्यविज्ञानहीन ऋचा वेदेन शब्दब्रह्ममात्राध्ययनेनेत्यर्थः। किं प्रयोजनं करिष्यति।

शब्दब्रह्मणि निष्णातो न निष्णायात्परे यदि।
श्रमः श्रमफलं तस्य ह्यधेनुमिव रक्षतः॥

इति परब्रह्मज्ञानहीनस्याधीतशब्दब्रह्मणोऽपि श्रममात्रफलत्वश्रवणात्। ये पुनस्तत्परद्ब्रह्म इत् इत्थं पूर्वोक्तप्रकारेण विदुर्विदितवन्तस्त इमे वर्त्तमाना जीवन्मुक्ता एव समासते परब्रह्मणि सम्यगासीना भवन्तीत्यर्थः।

अयं भावः—लोके अधीतसमस्तवेदमन्त्रोऽपि पुरुषस्तत्परमतात्पर्य्यभूतपरब्रह्मात्मैक्यापरोक्षज्ञानानुभवहीनश्चेत्तदा तदध्ययनश्रमश्चित्तशुद्धिमात्रप्रयोजनो भवेत् न तु सद्योमुक्तिप्रयोजन इति।

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्य्यकृतौ
बह्वृचोपनिषद्भाष्यं समाप्तम्।
॥ शिवम् ॥

हिन्दी टीका

ज्ञातृ–ज्ञान–ज्ञेय नामक त्रिपुटी की अभेद भावना को, भावनोपनिषद् में, श्री चक्र पूजन कहा गया है। इस प्रकार स्पष्ट रूप से अभिहित होते हुए भी कतिपय साधक उपनिषद् के आदेश का पालन करके अन्य दुर्बल प्रमाणों का आश्रय लेकर श्री चक्र का चित्रण कर काम एवं अर्थ के समुद्र में स्वयं डूबते हुए अन्यों को भी डुबा लेते हैं। आध्यात्मिक तत्त्व रूप परिवार से युक्त होने के कारण यह देह ही देवालय है। जीव सदाशिव है। अज्ञान रूपी मल का परित्याग कर सोऽहं भाव से पूजन करना चाहिये। जैसा कि कहा है :—

"देहो देवालयः प्रोक्तो जीवो देहः सदाशिवः।
त्यजेदज्ञान निर्माल्यं सोऽहं भावेन पूजयेत्"॥

अतः बाह्य आराधन की अपेक्षा सगुण मूर्त देवी की अन्तः भावनात्मक उपासना का प्रतिपादन उपनिषद् में है इस प्रकार के पूजन में चिद् अग्नि स्वरूप परमानन्द शक्ति का स्फुरण ही देवता के लिये वस्त्र हैं। आत्मा के अतिरिक्त सभी वस्तुओं का संगरहित स्मरण विभूषण हैं तथा असङ्ग चिद् रूप निर्गुण ब्रह्म-भावना ही पूजा है। जाग्रत्, स्वप्न, सुषुप्ति अवस्थाओं के एकीकरण से आविर्भूत ताम्बूल तथा तुरीय अवस्थात्मक नमस्कार से निर्गुण ब्रह्मभाव की अनुभूति होती है। मूलाधार से ब्रह्मरन्ध्र पर्यन्त कुण्डलिनी के आवागमन से देहशून्य प्रमाता के स्वरूप में समष्टि–चैतन्य का निमज्जन हो जाता है इसके फलस्वरूप सर्वगत ब्रह्मभाव की सहज उत्पत्ति होती है। इस प्रकार श्री चक्र पूजन, देवता के सगुण मूर्त आराधन द्वारा अभिलषति कार्य की सिद्धि प्राप्त करना ही लक्ष्य नहीं है अपितु निर्गुण ब्रह्म की उपासना से मोक्ष कार्य की सिद्धि ही लक्ष्य है। (परम शाक्त भास्करराय एवं अप्पय दीक्षित कृत भावनोपनिषद् भाष्य से)

अतएव अत्यन्त तुच्छ जीव से ब्रह्मा, विष्णु, रुद्र पर्यन्त देवों की जननी के रूप में महात्रिपुर सुन्दरी के सत्यात्मक स्वरूप को अद्वितीय अखण्ड ब्रह्मात्मक प्रतिपादित करने के हेतु यह बह्वृचोपनिषद् कहा गया है। इस उपनिषद में परा देवी का "प्रज्ञानं ब्रह्म", "अहं ब्रह्मास्मि", "तत्त्वमसि", "अयमात्मा ब्रह्म" चार महावाक्यों के द्वारा प्रतिपादन किया गया है। परम वेदान्ती अप्पय दीक्षित कृत भाष्य के आधार पर हिन्दी टीका लिखी जाती है।

टीका

पहिले जगत् की उत्पत्ति से पूर्व सगुण निर्गुणात्मिका देवी एक अद्वितीय रूप थी। देवी ने अण्डाकार इस जगत् आकाश आदि के पञ्चीकरण से सृजन किया। सगुण अंशों से वह कामकला, शृंगार कला नामों से प्रसिद्ध है। चतुर्मुख ब्रह्म, विष्णु एवं रुद्र की जननी देवी महा त्रिपुर सुन्दरी ही हैं। गन्धर्व आदि समस्त सृष्टि की इनके द्वारा उत्पत्ति कही गई है। ब्रह्मा, विष्णु एवं रुद्र से भी अधिक तुरीय रूप होने से स्वयं के प्राधान्य के कारण इनको परा कहा गया है। यह परा शक्ति समस्त जगत् का कारण स्वरूप है। यह परा देवी ही शाम्भवी, सगुणा एवं निर्गुणा विद्या है। क ए ई ल ह्रीं द्वारा उक्त प्रथम वाग्भव कूट के कारण यह कादि विद्या है, ह स क ह ल ह्रीं द्वारा उक्त द्वितीय पाद के अर्थ के कारण यह हादि विद्या कही गई है, तथा सकल ह्रीं द्वारा उक्त तृतीय पादार्थ के कारण यह सादि विद्या के नाम से प्रसिद्ध है। यही परा शक्ति पञ्चदशाक्षरी श्री विद्या ही शाम्भवि विद्या कहीं जाती, यदि ओंकार का प्रयोग किया जावें। ॐ सत्य स्वरूप है यही इस का रहस्य है। अभ्युदय की कामना करनेवाले इसकी मूर्तरूप से उपासना तथा निःश्रेयसार्थी अमूर्त चैतन्य आत्मरूप में उपासना करते हैं। 'अहं ब्रह्मास्मि', 'तत्वमसि', 'अयमात्मा ब्रह्म' आदि वाक्यों के द्वारा इस विद्या की भावना की जाती है। 'अहमस्मि', 'योऽहमस्मि', 'सोऽहमीति', 'योऽसौ सोऽहमस्मीति' वाक्यों की पूर्वोक्त वाक्य चतुष्टय 'प्रज्ञानं ब्रह्म' आदि वाक्यों से विलक्षणता प्रतीत होती है किन्तु 'प्रज्ञानं ब्रह्म' आदि पूर्वोक्त वाक्य अधिकारी, सम्बन्ध, विषय एवं प्रयोजन आत्मक अनुबन्ध चतुष्टय की दृष्टि से कहे गये हैं जबकि 'अहमस्मि' आदि वाक् चतुष्टय केवल विषय को उद्देश्य करके कहे गये हैं। 'प्रज्ञानं ब्रह्म' आदि चार वाक्य दर्शन, श्रवण, मनन, निदिध्यासन की दृष्टि से क्रमशः निरूपण करते हैं।

यह जो मुमुक्षुओं के द्वारा महावाक्यार्थों से निर्गुण ब्रह्म चैतन्य रूपिणी पराशक्ति की उपासना की जाती है वही पराशक्ति व्यवहार दशा में प्रणव के साथ जपने से षोडशी, श्री विद्या, कादि पञ्चदशी महात्रिपुर आदि सगुण नामों से अभ्युदयार्थी साधकों द्वारा व्यवहृत की जाती है।

यहां यह शङ्का उत्पन्न होती है कि निःश्रेयस और अभ्युदय नामक दो मार्ग तम एवं प्रकाश के समान परस्पर विरोधी है। निःश्रेयस ज्ञानियों का विषय है एवं अभ्युदय अज्ञानियों का। इस उपनिषद् में निःश्रेयस साधकों के लिये निर्गुण उपासना एवं अभ्युदयार्थी साधकों के लिये सगुणोपासना का विधान है अतः एकवाक्यता का अभाव है। 'प्रज्ञानम् ब्रह्म' आदि वाक्यों से सगुण ब्रह्मत्व की उपासना अनुचित है तथा महात्रिपुरसुन्दरी आदि शब्दों के द्वारा निर्गुण ब्रह्म की उपासना की कल्पना अनुचित है।

उपर्युक्त शङ्का के परिहार के लिये भाष्यकार ने लिखा है कि निःश्रेयस एवं अभ्युदय नामक उभय फलों की सिद्धि के हेतु मध्यम अधिकारी को उद्देश्य कर इस उपनिषद् में सगुण एवं निर्गुण उभय विषयों की प्रवृति है। मन्दाधिकारी के लिये सगुण मात्र की उपासना एवं उत्तम अधिकारी के लिये निर्गुण मात्र की उपासना का विधान है अतः अधिकारी भेद पर आश्रित होने से सगुण एवं निर्गुण उभय लिङ्गों में प्रतिपादित उपनिषद में विरोध नहीं है।

उपनिषद का उपसंहार "ऋचः अक्षरे परमे व्योमन्" वाक्य से की गई है। इसका अर्थ है कि ऋग् आदि वेदमन्त्र एवं समस्त विश्व-देवतागण का अक्षर अविनाशि परम सर्वोत्कृष्ट व्योम अर्थात् चिदाकाश में अवस्थान है। चिदाकाशात्मक निर्गुण परब्रह्म का सकल वेद एवं देवों में अधिष्ठान है अतएव जो अक्षर आदि परम ब्रह्म को नहीं जानता वह जो ब्रह्म एवं आत्मा एवं परमात्मा के तादात्म्य प्रतिपादक विज्ञान से हीन हैं वे केवल शब्द ब्रह्म के अध्ययन से ऋचा का अर्थ नहीं समझ सकते। कहा है :—

"शब्द ब्रह्मणि निष्णातो न निष्णायात्परे यदि।
श्रमः श्रमफलं तस्य ह्यधेनुमिव रक्षतः॥"

केवल वे जो परब्रह्म के विज्ञान में निष्णात् हैं जीवन-मुक्ति पद पा सकते हैं। जो समस्त वेद के मन्त्रों के वेत्ता हैं परन्तु परम तात्पर्य भूत परब्रह्म एवं आत्मा के ऐक्य के अपरोक्ष (प्रत्यक्ष) ज्ञान से रहित हैं उनको केवल चित्त शुद्धि कदाचित् हो सकती है किन्तु सद्योमुक्ति के वे अधिकारी नहीं हैं।

गुरुवर ब्रह्मलीन श्री स्वामीजी महाराज ने ईशोपनिषद् के योगपरक भाष्य में "अन्धन्तमः प्रविश्यन्ति.....प्रारम्भ होने वाले मन्त्र क्र. ९ से ११ तक

"सम्भूतिञ्च विनाशञ्च यस्तद् वेदोभयं सह।
विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते॥"

का इसी अर्थ में भाष्य किया है जो असम्भूति अर्थात् कारण एवं विनाश अर्थात् कार्य को अङ्गाङ्गि भाव में उपासता है वह सम्भूति से जननमरण रूप मृत्यु को तैरकर असम्भूति अर्थात् कारण रूप प्राण तत्व से अमृत को प्राप्त कर लेता है। व्यक्त वर्णात्मक एवं अव्यक्त नादरूप वाणी उभय की जो उपासना करता है वह व्यक्त से मुत्यु पार कर अव्यक्त से अमृतत्व को प्राप्त करता है।

मूलाधार गत कुण्डलिनी जब सहस्रार शिव से जाकर मिलती है तब वह सुधा सरोवर में स्नान कर अपने को पूर्ण अमृत शिवमय अनुभव करती तथा पुनः अपने स्थान तक पहुंचने के मार्ग में समस्त प्रपञ्च को अमृत से सिञ्चित करती हुई विराजती है। श्रीमदाचार्य शङ्कर ने सौन्दर्य लहरी के श्लोक क्र. ९, १० में इस प्रकार परा देवी के अभिषेक की चर्चा की है।

"सहस्रारे पद्मे सह रहसि पत्या विहरसे", तथा "सुधा धारा सारैश्चरण युगलान्त-विगिलितैः" आदि श्लोकों में इस विषय का प्रतिपादन किया है। जब ब्रह्म और शक्ति का तादात्म्य घटित होता तभी पूर्ण अभिषेक कहा है। श्री विद्या रहस्यं में तृतीय श्लोक में अपने भाष्य में इसी मत का प्रतिपादन किया है।

" तीर्थमद्वय सुधारसोदधेर्वारितं निज विमर्श वेलया।
आणवादि मलमोचितं स्नानमत्र विधिना निमज्जनम् ॥"

अतएव देवता एवं ब्रह्म के तादात्म्य प्रतिपादक उपनिषदों से ही अभिषेक करने की प्रथा है। जैसे देवी का अभिषेक देवी अथर्व शीर्ष से, गणेश का अभिषेक गणेश अथर्व शीर्ष से आदि—इसी प्रकार त्रिपुरसुन्दरी का अभिषेक भी त्रिपुरसुन्दरी को ब्रह्मस्वरूपिणी प्रतिपादक बह्वृचोपनिषद् से अभिषेक करना चाहिये।

श्री पीताम्बरापीठ, दतिया (म. प्र.) से प्रकाशित

ग्रन्थ–सूची

क्र.	नाम पुस्तक	लेखक /टीकाकार	माध्यम	मूल्य
१.	श्री बगलामुखी रहस्यम्	राष्ट्रगुरु १००८ श्री स्वामीजी महाराज पीताम्बरा-पीठ	संस्कृत	१८–००
२.	पञ्चोपनिषद् (प्रकाश भाष्य)	,, ,, ,,	,,	४–५०
३.	प्रश्नोपनिषद् (प्रकाश भाष्य)	,, ,, ,,	,,	१–००
४.	आनन्दलहरी शङ्कराचार्य	श्री रामकवि डिण्डिम भाष्य एवं गोपाल सुन्दरी टीका	,,	७–००
५.	नारदीय शिक्षा नारदमुनि विरचित	भट्ट शोभाकर विरचित शिक्षा विवरणोपेता टीकासहित	,,	१–५०
६.	श्री महात्रिपुरसुन्दरी पूजा पद्धति	राष्ट्रगुरु पूज्यपाद १००८ श्री स्वामीजी महाराज	,,	५–००
७.	कामकला विलास	पुण्यानन्दनाथ	,,	५–००
८.	महाविद्याचतुष्टयम् (तारा–धूमावती, भुवनेश्वरी मातङ्गी)	राष्ट्रगुरु १००८ श्री स्वामीजी महाराज	,,	८–००
९.	रेणुका–तंत्रम्	,, ,, ,,	,,	६–००
१०.	शरभ–तंत्रम्	,, ,, ,,	,,	५–००
११.	श्रीविद्यारत्नसूत्रम् गौडपादाचार्य कृत	श्री शंकराण्यमुनिकृत दीपिका सहितं	,,	३–००
१२.	पञ्चस्तवी	,, ,, ,,	,,	०–५०
१३.	तांत्रिक–पञ्चांग	राष्ट्रगुरु १००८ श्री स्वामीजी महाराज	,,	७–००
१४.	घेरण्ड संहिता–घेरण्ड मुनि	,, ,, ,,	संस्कृत-हिन्दी	५–००
१५.	प्रत्यभिज्ञाहृदयम् शाक्त दर्शन		हिन्दी	२–००

क्र.	नाम पुस्तक	लेखक /टीकाकार	माध्यम	मूल्य
१६.	ईश्वर गीता कूर्मपुराणान्तर्गत	राष्ट्रगुरु १००८ श्री स्वामीजी महाराज	हिन्दी	६–००
१७.	वैदिक–उपदेश	,, ,, ,,	,,	५–००
१८.	वैदिक–उपदेश	अनु. श्री जी. एन. पिंगले	अंग्रेजी	१५–००
१९.	अथर्ववेदाङ्ग ज्योतिष	अनु. पं. छोटेलाल शर्मा आचार्य पं. ओं. नारायण द्विवेदी	हिन्दी	१–००
२०.	पुरश्चरण पद्धति	स्व. योगीन्द्रकृष्ण दौर्गादत्ति शास्त्री	,,	२–५०
२१.	लेख–संग्रह	राष्ट्रगुरु १००८ श्री स्वामीजी महाराज	,,	१२–००
२२.	वेदान्त प्रबोध सत्यबोधाश्रम प्रणीत	अनु. डा. शिवशरण शर्मा	संस्कृत-हिन्दी	२–००
२३.	सिद्धान्त रहस्य	राष्ट्रगुरु १००८ श्री स्वामीजी महाराज	हिन्दी	३–००
२४.	सिद्धान्त रहस्य	अनु. श्री शिवदत्त शर्मा चतुर्वेदः	संस्कृत	३–००
२५.	सिद्धान्त रहस्य	अनु. सी. डी. पान्डे	अंग्रेजी	
२६.	सौंदर्य लहरी पद्यानुवाद	अनु. स्व. फौजदार बलवीरसिंह	पद्य हिन्दी	१–००
२७.	परश्चरण	श्री सूर्यप्रकाश गोस्वामी	पद्य	१–००
२८.	त्रिपुरा महिम्न स्तोत्र	स्व. योगीन्द्रकृष्ण दौर्गादत्ति शास्त्री	संस्कृत-हिन्दी	३–००
२९.	चिद्–विलास (श्री विद्या रहस्य)	राष्ट्रगुरु १००८ श्री स्वामीजी महाराज	,,	१–५०
३०.	चिद्–विलास	अनु. डा. योगेश मिश्र	अंग्रेजी सजिल्द	३–०० ७–००
३१.	सप्तविंशति रहस्यम्	राष्ट्रगुरु १००८ श्री स्वामीजी महाराज	संस्कृत	७–००
३२.	वातुलनाथ सूत्र अनन्तशक्तिपादकृत	पं. कृष्णानन्द बुधौलिया	संस्कृत-हिन्दी	२–००
३३.	शिवसूत्रं–भक्तिसूत्रञ्च	राष्ट्रगुरु १००८ श्री स्वामीजी महाराज ऋज्वर्थ बोधिनी कृति	संस्कृत	१–००
३४.	शिवसूत्रं स्पंदकारिका	किशोरीलाल चउदा	संस्कृत-हिन्दी	१–५०
३५.	मातृका चक्र विवेक	ले. सिद्धश्री स्वतन्त्रानन्दनाथ भाष्य–शिवानन्द अनु. कृष्णानन्द बुधौलिया	संस्कृत-हिन्दी	१५–००

क्र.	नाम पुस्तक	लेकक /टीकाकार	माध्यम	मूल्य
३६.	स्वरोदय विज्ञान	संकलनकर्ता मास्टर मोतीलाल	हिन्दी	३–००
३७.	योग विज्ञान प्रथम भाग	अज्ञात	,,	४–००
३८.	योग विज्ञान द्वितीय भाग	अज्ञात	,,	४–००
३९.	योग–दर्शन महर्षि पातञ्जल प्रणीत	अनन्तपण्डितकृत वृति	संस्कृत	२–५०
४०.	योग दर्शन महर्षि पातञ्जलि प्रणीत	अनु. डा. योगेश मिश्र	अंग्रेजी	४–००
४१.	दर्शन शास्त्र संग्रह	राष्ट्रगुरु १००८ श्री स्वामीजी महाराज	हिन्दी	५–००
४२.	छिन्नमस्ता नित्यार्चन	,, ,, ,,	,,	६–००
४३.	ताराकर्पूरराजस्तोत्र	,, ,, ,,	हिन्दी-पद्य	१–५०
४४.	केनोपनिषद्	अनु. डा. योगेश मिश्र, जयपुर	हिन्दी	२–००
४५.	ईशावास्योपनिषद्	,, ,, ,,	,,	३–५०
४६.	माण्डूक्योपनिषद्	टीकाकार–पं. कृष्णानन्द बुधौलिया	,,	१–७५
४७.	कठोपनिषद्	टीकाकार–बदनसिंह	,,	५–५०
४८.	मुण्डकोपनिषद्	,, ,,	,,	६–००
४९.	पराप्रवेशिका महामाहेश्वराचार्य क्षेमराज बिरचित	टीकाकार–पं. कृष्णानन्द बुधौलिया	हिन्दी पद्यानुवाद एवं टीका	०–७५
५०.	शाक्त सौरभ	ले. श्री बदनसिंह	हिन्दी	७–००
५१.	शाक्त सौरभ (ज्ञान खण्ड)	,, ,,	,,	१२–००
५२.	ललिता सहस्रनाम	भास्कर राय विरचित सौभाग्यभास्कर	संस्कृत	३२–००
५३.	सुभगोदय	आचार्य गौडपाद कृत अनु. कृष्णानन्द बुधौलिया	संस्कृत-हिन्दी	यन्त्रस्थ
५४.	भैरव–विज्ञान	पं कृष्णानन्द बुधौलिया	हिन्दी	९–००
५५.	प्रश्नोपनिषद्	राष्ट्रगुरु १००८ श्री स्वामीजी कृत प्रकाश भाष्य का हिन्दी अनुवाद अनुवादक–कृष्णानन्द बुधौलिया		यन्त्रस्थ
५६.	बहवृचोपनिषद्	अप्पय दीक्षित कृत संस्कृत भाष्य एवं कृष्णानन्द कृत हिन्दी टीका	संस्कृत-हिन्दी	१–००

आवश्यकतानुसार मूल्य में परिवर्तन हो सकता है।

श्री पीताम्बरा पीठ
ह्रीं
दतिया (म.प्र.)